**इयम् आकाशवाणी**

**दिनाङ्क :-13.12.2025 प्रात: - 06:55**

**अथ वार्ता:**

**मन्त्रिमण्डल जनगणना**

केन्द्रीय-मन्त्रिमण्डलेन जनगणना-विंशति-सप्तविंशतिः इत्यस्य कृते अष्टादशोत्तर-सप्तशताधिक-एकादशसहस्र-कोटिरूप्यकाणां बजट इत्यस्य व्ययराशेः अनुमोदनम् कृतम् वर्तते। सूचना-प्रसारणमन्त्री अश्विनी-वैष्णवः नवदिल्ल्यां पत्रकारैः सह संवादे उक्तवान्, यदियं जनगणना द्वयोः चरणयोः भविष्यति।

**वैष्णव जनगणना** – 26 **से.**

श्री वैष्णवः अवदत् यत् आर्थिक-कार्याणां मन्त्रिमण्डल-समित्या कोयला इति कृष्णांगार-सम्बद्धनीतेः – कोयलासेतुः इत्यस्यापि अनुमोदनं कृतम् अस्ति। सः अवदत्, यद् आर्थिक-कार्याणां मन्त्रिमण्डल-समित्या विंशति-षड्विंशति-तमस्य वर्ष-सत्रस्य कृते कोपरा इत्यस्य शुष्क-नारिकेलस्य कृते न्यूनतम-समर्थन-मूल्यम् अपि अनुमोदितम् अस्ति।

पीएम-कोपरा

प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना उक्तं यत्, केन्द्रीय-मन्त्रिमण्डलेन अनुमोदित-कृष्णांगार-सेतु-नीतिः भारतस्य ऊर्जासुरक्षां सुदृढं कर्तुं, विकासं च त्वरितं कर्तुं, महत्त्वपूर्णं सोपानम्, अस्ति। ह्यः सामाजिक-माध्यम-सन्देशे श्रीमोदी अवदत् यत् कोयलासेतु-नीतिः अङ्गारस्य निर्विघ्नं, कुशलं, पारदर्शकं च उपयोगं सक्षमं कर्तुं नूतन-गवाक्षम् उद्घाटयति। प्रधानमन्त्रिणा उक्तं यत्, कोपरा इत्यस्य न्यूनतम-समर्थनमूल्यं वर्धयितुं सर्वकारस्य निर्णयः न केवलं नारिकेल-कृषकाणां आयं वर्धयिष्यति, अपितु कोपरा-उत्पादनं च प्रोत्साहयिष्यति। श्रीमोदी अवदत् यत् सर्वकारः देशे सर्वत्र कृषकाणां जीवनस्तरस्य उन्नयनार्थं प्रतिबद्धः अस्ति।

**प्रधानमन्त्री नरेन्द्र मोदी - यात्रा**

प्रधानमन्त्री नरेन्द्र मोदी सोमवासरात् आरभ्य जॉर्डन्, इथियोपिया, ओमानदेशानां यात्रां करिष्यति। गतसायं नवदिल्लीनगरे माध्यम-समूहान्, सूचयन्, विदेश-मन्त्रालयस्य सचिवा (दक्षिणः) डॉ. नीना मल्होत्रा उक्तवती यत्, प्रधानमन्त्री अस्य मासस्य पञ्चदश-दिनाङ्कात् षोडश-दिनाङ्क-पर्यन्तं राज्ञः अब्दुल्लाह-द्वितीय-बिन् अल-हुसैनस्य आमन्त्रणेन जॉर्डनदेशं गमिष्यति। सा अवदत् यत् द्वयोः देशयोः कूटनीतिक-सम्बन्धस्य स्थापनायाः पञ्चसप्तति-तमे वर्षे प्रधानमन्त्रिणः मोदिनः प्रथमा जॉर्डनयात्रा भविष्यति। अतः पश्चात् श्रीमोदी अस्य मासस्य षोडश-सप्तदश दिनाङ्कयोः इथियोपिया-देशं गमिष्यति। सा अवदत् यत्, एषा यात्रा दक्षिण-दक्षिणसहकार्यं गभीरं कर्तुं भारतस्य प्रतिबद्धतां प्रतिबिम्बयति। तथा च, स्वस्य भ्रमणस्य अन्तिमपदे प्रधानमन्त्री डिसेम्बर्-मासस्य सप्तदश-अष्टादश-दिनांकयोः ओमान-यात्रां करिष्यति यत्र प्रधानमन्त्रिणा सह उच्चस्तरीय-प्रतिनिधिमण्डलं भविष्यति।

लोकसभा विमानभाडा

नागरिक-विमाननमन्त्री के.राममोहननायडुः उक्तवान् यत्, देशे विमान-निर्माणं आरभ्यते । श्रीनायडुः अवदत् यत्, हिन्दुस्तान एरोनॉटिक्स लिमिटेड्, रशिया-विमान-संस्था-सुखोई इत्यस्मात् सम्बन्धित-प्रौद्योगिकीम् प्राप्तुं प्रयतते। लोकसभायां विमान-मूल्य-नियमन-सम्बद्धस्य प्रस्तावस्य प्रतिक्रिया-रूपेण नागरिक-विमानन-मन्त्री अवदत् यत्, केन्द्रसर्वकारस्य पार्श्वे असाधारण-परिस्थितौ विमान-प्रयाण-मूल्यस्य सीमां निर्धारयितुम् अधिकारः अस्ति।

**संसद आक्रमण वार्षिकोत्सवः**

अद्य सम्पूर्णं राष्ट्रं चतुर्विंशति-वर्षपूर्वं डिसेम्बर्-मासस्य त्रयोदश-दिनाङ्के आतङ्कवादी-आक्रमणे संसदः रक्षणं कुर्वन्तः प्राणान् त्यक्तवतेभ्यः सुरक्षाकर्मचारिभ्यः श्रद्धांजलिम् समर्पयति। अस्य अवसरस्य निमित्तं संसदभवन-परिसरे, प्राणाहुतिं

समर्पितवद्भ्यः सुरक्षाकर्मचारिभ्यः पुष्प-श्रद्धांजलि-प्रदानार्थं समारोहस्य आयोजनं क्रियते। उपराष्ट्रपतिः एवं राज्यसभा अध्यक्षः सीपी राधाकृष्णन, प्रधानमंत्री नरेन्द्र मोदी, लोकसभा अध्यक्ष ओम बिरला, केन्द्रीय मंत्रिणः एवं संसत्-सदस्याः संसद-भवने पुष्प श्रद्धांजलिं समर्पयिष्यन्ति।

**पुरुष-न्यून-नवदश-एशिया-कप-क्रिकेट्**

क्रिकेट्-क्रीडायां, गतरात्रौ, दुबई-नगरे, पुरुष-न्यून-नवदश-एशिया-कप-क्रिकेट् इत्यस्य उद्घाटन-क्रीडायां, भारतेन यूएई-देशः चतुस्त्रिंशदुत्तर-द्विशतम् धावनांकैः पराजितः।

**।।इति वार्ताः।।**